नलोपाख्यानम्

19

बृहदश्व उवाच।

अथ दीर्घस्य कालस्य पर्णादो नाम वै द्विजः।

प्रत्येत्य नगरं भैमीमिदं वचनमब्रवीत्॥ ३-६८-१ ॥

नैषधं मृगयानेन दमयन्ति दिवानिशम्।

अयोध्यां नगरीं गत्वा भाङ्गस्वरिरुपस्थितः॥ ३-६८-२ ॥

श्रावितश्च मया वाक्यं त्वदीयं स महाजने।

ऋतुपर्णो महाभागो यथोक्तं वरवर्णिनि॥ ३-६८-३ ॥

तच्छ्रुत्वा नाब्रवीत्किंचिदृतुपर्णो नराधिपः।

न च पारिषदः कश्चिद्भाष्यमाणो मयासकृत्॥ ३-६८-४॥

अनुज्ञातं तु मां राज्ञा विजने कश्चिदब्रवीत्।

ऋतुपर्णस्य पुरुषो बाहुको नाम नामतः॥ ३-६८-५॥

सूतस्तस्य नरेन्द्रस्य विरूपो ह्रस्वबाहुकः।

शीघ्रयाने सुकुशलो मिष्टकर्ता च भोजने॥ ३-६८-६ ॥

miṣṭa – вкусный; *n* изысканное блюдо;

स विनिःश्वस्य बहुशो रुदित्वा च मुहुर्मुहुः।

कुशलं चैव मां पृष्ट्वा पश्चादिदमभाषत॥ ३-६८-७॥

वैषम्यमपि संप्राप्ता गोपायन्ति कुलस्त्रियः।

आत्मानमात्मना सत्यो जितस्वर्गा न संशयः।

रहिता भर्तृभिश्चैव न क्रुध्यन्ति कदाचन॥ ३-६८-८॥

विषमस्थेन मूढेन परिभ्रष्टसुखेन च।

यत्सा तेन परित्यक्ता तत्र न क्रोद्धुमर्हति॥ ३-६८-९॥

प्राणयात्रां परिप्रेप्सोः शकुनैर्हृतवाससः।

आधिभिर्दह्यमानस्य श्यामा न क्रोद्धुमर्हति॥ ३-६८-१०॥

ādhi *m* – забота, тревога;

सत्कृतासत्कृता वापि पतिं दृष्ट्वा तथागतम्।

भ्रष्टराज्यं श्रिया हीनं श्यामा न क्रोद्धुमर्हति॥ ३-६८-११॥

तस्य तद्वचनं श्रुत्वा त्वरितो ऽहमिहागतः।

श्रुत्वा प्रमाणं भवती राज्ञश्चैव निवेदय॥ ३-६८-१२॥

एतच्छ्रुत्वाश्रुपूर्णाक्षी पर्णादस्य विशां पते।

दमयन्ती रहो ऽभ्येत्य मातरं प्रत्यभाषत॥ ३-६८-१३॥
अयमर्थो न संवेद्यो भीमे मातः कथंचन।
त्वत्संनिधौ समादेक्ष्ये सुदेवं द्विजसत्तमम्॥ ३-६८-१४॥
यथा न नृपतिर्भीमः प्रतिपद्येत मे मतम्।
तथा त्वया प्रयत्तव्यं मम चेत्प्रियमिच्छसि॥ ३-६८-१५॥
यथा चाहं समानीता सुदेवेनाशु बान्धवान्।
तेनैव मङ्गलेनाशु सुदेवो यातु माचिरम्।
समानेतुं नलं मातरयोध्यां नगरीमितः॥ ३-६८-१६॥
विश्रान्तं च ततः पश्चात्पर्णादं द्विजसत्तमम्।
अर्चयामास वैदर्भी धनेनातीव भामिनी॥ ३-६८-१७॥
नले चेहागते विप्र भूयो दास्यामि ते वसु।
त्वया हि मे बहु कृतं यथा नान्यः करिष्यति।
यद्भर्त्राहं समेष्यामि शीघ्रमेव द्विजोत्तम॥ ३-६८-१८॥
एवमुक्तो ऽर्चयित्वा तामाशीर्वादैः सुमङ्गलैः।
गृहानुपययौ चापि कृतार्थः स महामनाः॥ ३-६८-१९॥
ततश्चानाय्य तं विप्रं दमयन्ती युधिष्ठिर।
अब्रवीत्संनिधौ मातुर्दुःखशोकसमन्विता॥ ३-६८-२०॥
गत्वा सुदेव नगरीमयोध्यावासिनं नृपम्।
ऋतुपर्णं वचो ब्रूहि पतिमन्यं चिकीर्षती।
आस्थास्यति पुनर्भैमी दमयन्ती स्वयंवरम्॥ ३-६८-२१॥
तत्र गच्छन्ति राजानो राजपुत्राश्च सर्वशः।
यथा च गणितः कालः श्वोभूते स भविष्यति॥ ३-६८-२२॥
यदि संभावनीयं ते गच्छ शीघ्रमरिंदम।
सूर्योदये द्वितीयं सा भर्तारं वरयिष्यति।
न हि स ज्ञायते वीरो नलो जीवन्मृतो ऽपि वा॥ ३-६८-२३॥
एवं तया यथोक्तं वै गत्वा राजानमब्रवीत्।
ऋतुपर्णं महाराज सुदेवो ब्राह्मणस्तदा॥ ३-६८-२४॥